# Shri Mallikarjuna Stotram

# શ્રીમલ્લિકાર્જુનસ્તોત્રમ્

## Document Information

Text title : Shri Mallikarjuna Stotram 02 28

File name : mallikArjunastotram.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-28

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

# શ્રીમલ્લિકાર્જુનસ્તોત્રમ્

શ્રીકણ્ઠાદિસમસ્તરુદ્રનમિતો વામાર્ધજાનિઃ શિવઃ
પ્રાલેયાચલહારહીરકુમુદક્ષીરાબ્ધિતુલ્યપ્રભઃ ।
વિષ્વક્સેનવિધાતમસ્તમકુટીરત્નપ્રભાભાસ્વરઃ
શ્રીમત્પર્વતમલ્લિકાર્જુનમહાદેવઃ શિવો મે ગતિઃ ॥ ૧॥

ઇન્દ્રાદ્યામરયાતુધાનકરવલ્લીવેલ્લિતાશીવિષા-
ધીશાકર્ષિતમન્દરાગમથિતામ્ભોરાશિજાતસ્ફુર- ।
ત્ક્ષ્વીલાસંહિતવિસ્ફુલિઙ્ગગરલગ્રાસૈકશામ્યદ્ભયઃ
શ્રીમત્પર્વતમલ્લિકાર્જુનમહાદેવઃ શિવો મે ગતિઃ ॥ ૨॥

ઉદ્યદ્ભાસુરકાસરાસુરભુજાદર્પાદ્રિદમ્ભોલિભૃ-
ત્પાટીરામરધેનુનાયકકકુદ્વિન્યસ્તહસ્તામ્બુજઃ ।
નીહારાચલકન્યકાવહનપાદદ્વન્દ્વપાદોરુહઃ
શ્રીમત્પર્વતમલ્લિકાર્જુનમહાદેવઃ શિવો મે ગતિઃ ॥ ૩॥

નીરેજાસનમુખ્યનિર્જરશિરઃપ્રચ્છન્નપાદદ્વયઃ
સર્વજ્ઞત્રિપુરાસુરાહિતગણામ્ભોદૌઘઝઞ્ઝાનિલઃ ।
માર્કણ્ડેયમહામુનીશ્વરનુતપ્રખ્યાતચારિત્રકઃ
શ્રીમત્પર્વતમલ્લિકાર્જુનમહાદેવઃ શિવો મે ગતિઃ ॥ ૪॥

સદ્ભક્તાવલિમાનસામ્બુરુહચઞ્ચચ્ચઞ્ચરીકો મૃડઃ
ક્રીડાબન્ધુરપાણિહૃત્કમલપોતઃ કર્ણગોકર્ણરાટ્ ।
ચક્રી ચક્રસમસ્તભૂષણગણઃ કોલાસુરધ્વંસકઃ
શ્રીમત્પર્વતમલ્લિકાર્જુનમહાદેવઃ શિવો મે ગતિઃ ॥ ૫॥

કલ્યાણાચલકાર્મુકપ્રથિતદુગ્ધામ્ભોધિકન્યામનઃ
કઞ્જાતભ્રમરાયમાણવિલસદ્ગોવિન્દસન્માર્ગણઃ ।
ધાત્રીસ્યન્દનભાસમાનનલિનીજાત(પ્ર)ત્રયીસૈન્ધવઃ
શ્રીમત્પર્વતમલ્લિકાર્જુનમહાદેવઃ શિવો મે ગતિઃ ॥ ૬॥

ગોરાજોત્તમવાહનઃ શશિકલાલઙ્કારજૂટઃ સદા
    પદ્માનાયકસાયકસ્ત્રિભુવનાધીશઃ પશૂનાં પતિઃ ।
ભક્તાભીષ્ટફલપ્રદાનચતુરઃ કારુણ્યપાથોનિધિઃ
    શ્રીમત્પર્વતમલ્લિકાર્જુનમહાદેવઃ શિવો મે ગતિઃ ॥ ૭॥

પાતાલામરવાહિનીવરજલક્રીડાસમેતઃ સદા
    રમ્ભાકનનવાટિકાવિહરણોદ્યુક્તસ્ત્રયીગોચરઃ ।
ફાલાક્ષો ભ્રમરામ્બિકાહૃદયપઙ્કેજાતપુષ્પન્ધયઃ
    શ્રીમત્પર્વતમલ્લિકાર્જુનમહાદેવઃ શિવો મે ગતિઃ ॥ ૮॥

॥ ઇતિ શ્રીમલ્લિકાર્જુનસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

---

*Shri Mallikarjuna Stotram*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*